# पौरूरवसमनसिजसूत्रम् सटीकम्

Paurūravasamanasijasūtram saṭīkam

## श्रीपुरूरवोमुनिना रचितम्

Purūravomuninā racitam

नीयल् डेल्मानिकोनाम्ना पण्डिताभिमानिना सम्पादितम्

January 10, 2006

नत्वा श्रीपितृपादाब्जं सर्वापत्तिनिवारकम्।
पौरूरवससूत्रस्य व्याख्याने कृतमानसः॥ १॥

श्रीकृष्णदीक्षितसुतः जयकृष्ण इति श्रुतः।
यथामति समारेभे सूत्रव्याख्यानदीपिकाम्॥ २॥

रतिशास्त्रपरिज्ञाने ये विहीना नराधमाः।
तेषां रतिः श्वानवत्स्यात् न रतेः सुखमश्नुते॥ ३॥

रतेः सुखस्य ज्ञानार्थं कामशास्त्रं समभ्यसेत्।
ज्ञात्वा कर्माणि कुर्वीत तत्रानन्दो भवेद्ध्रुवम्॥ ४॥

अन्यथा पशुवत्तेषां रतिर्कर्म सुनिष्फलम्।
न चानन्दो न च सुखं दुःखस्यैव तु कारणम्॥ ५॥

तस्माद्रतिसुखार्थं वै एतच्छास्त्रं समभ्यसेत्।
अधीते रतिशास्त्रे तु तात्पर्यज्ञानपूर्वकं॥ ६॥

तत्कर्मण्यधिकारी स्यान्नान्यथा वृषवद्भवेत् ।

## अथातः पौरूरवसं मनसिजसूत्रं व्याख्यास्यामः॥ १॥

**अथातः पौरूरवसं मनसिजसूत्रं व्याख्यास्याम** इति। अत्राथशब्दस्य कारणार्थपरत्वं नानन्तर्यार्थकत्वम्। अतः कारणादतःशब्दस्यानन्तर्यार्थकत्वं पङ्क्तिशरशरद उपरिष्टादेतच्छास्त्रस्य प्रवचनसङ्ग्रहाधिकारे आधिकारिकत्वमिति फलितार्थकथनम्, न तु तत्पुरस्तादयोग्यत्वाद्, अयोग्यत्वादेव तद्वाक्यश्रवणे अधिकाराभावाच्च। कारणार्थकत्वं सम्प्रदर्शयति ऋणश्रुतिः। अग्निष्वात्तादिपितॄणामृणनिर्मोचनकाले रतिशास्त्रपरिज्ञानस्य कारणत्वेनाभिमतत्वात्प्रजासर्जनद्वारा ऋणमोचकत्वम्, तस्मिन् प्रजासर्जने रतिशास्त्रपरिज्ञानपूर्वकमेव अभ्यनुज्ञासम्प्रदानम्, न तु चतुष्पाज्जातिविशेषवदभ्यनुज्ञासम्प्रदानं ज्ञात्वा कर्माणि कुर्वीतेति वाक्येन कर्ममात्रे कर्मतात्पर्यार्थाभिज्ञानस्यात्यावश्यकत्वात्, तादृक्तात्पर्यार्थज्ञानवतः परमापूर्वकफलाधिकारेऽपरोक्षानुभवदर्शनेन प्राधान्यतः फलभोक्तृत्वे कर्तृत्वावगमाज् ज्ञानवतः पुरुषस्य सर्वे कामाः प्रपूर्यन्त इति शातपथश्रुतेः। तस्मात्प्रजासर्जनाख्ये कर्मणि रतिशास्त्रप्रज्ञानस्याभीप्सिततमत्वेन कारणार्थप-

रत्वमिति निश्चितं भवति। **पौरूरवसमिति**। पुरूरवसा प्रोक्तं पौरूरवसम् तेन प्रोक्तमित्येतत्सूत्राधिकारे विहितस्य प्रत्ययविधानस्यात्रानुशासनमनुवादकत्वम्। पुरूरवास्तु षडशीतिसहस्रसमाः ऊर्वश्या सह रतिशास्त्रं समभ्यसत्। अद्वितीयः मनसिजशस्त्रप्रवर्तकाचार्यो बभूव। तथाच श्रुतिः — ऊवश्यसि अधरारणिमादत्ते। पुरूरवा उत्तरारणिमादत्त इत्यनेन वाक्येन उभयोराधाराधेयभावेन रतिस्मरयोः स्वरूपेण च राज्ञः रतिशास्त्रप्रवर्तकाचार्यत्वमित्युक्तं भवति। तादृग्राजर्षिसूत्रं व्याख्यास्याम इति। व्याख्यानं नामाभ्यन्तरीयतात्पर्यार्थं विविच्य स्तनन्धयेतराणां सुखबोधलब्धये विविच्य स्फुटीकरणम्। मनसिजसूत्रं कामशास्त्रं शम्बरारिर्मनसिज इत्यमरः। अलुक्समासो बोद्धव्यः। ख्या प्रकथन इत्यस्माद्धातोः कर्तीरि लोट् परस्मैपदोत्तमपुरुषबहुवचनान्तं पदम्॥ १॥

ननु अष्टवर्षं ब्राह्मणमुपनीयत तमध्यापयीत इत्येतच्छास्त्रबलेन उपनयनान्तरमध्यापनस्य अत्यावश्यकत्वेनाभिमतत्वम्, तत्र सामान्योपदेशकवाक्येन निगमाध्यापनस्यैवाभ्यर्हितत्वम्, आहोस्विदेतच्छास्त्रस्य वेतिसंशयवाक्यमुपन्यस्य तात्पर्यवाक्यानुकथनेन संशयवाक्यस्योपशमं कुर्वन्निगमाध्यापनस्यैवेप्सितार्थप्रदातृत्वेनाभिमतत्वम्, एतच्छास्त्रस्य तु कालान्तरोपदेशान्न निगमाध्यापनकालस्य विप्रतिपक्षित्वम्, कुतः? स्वकीयप्रवृत्त्युपदिष्टे काले स्वकीयप्रवृत्तेः चरितार्थत्वात्। विप्रतिपक्षं स्वीकृत्य निगमाध्ययनस्य विच्छित्तिपूर्वकमेतच्छास्त्रस्यैव प्राधान्येनाध्ययने प्राप्ते निगमाध्ययनविच्छित्तिजन्यस्यांहसः पर्यवसानं स्वस्मिन्नेव सम्भाव्येत, कुतः? अङ्गाध्ययनरूपत्वात्प्रधानाध्ययनं विना अङ्गाध्ययनं न हि विधातुं समुचितं भवतीत्येतत्पौर्वापर्यवाक्यं मनसि आलोच्य तात्त्विकार्थवाक्यं निश्चायकत्वेन मनसि स्थिरीकृत्यानुवदति —

**तच्छास्त्रपरिज्ञाने युवावस्थायाः प्रयोजकत्वात्॥ २॥**

**तच्छास्त्रपरिज्ञानेति**। यौवनावस्थायाः प्राप्तौ सत्यां एतच्छास्त्राध्ययने कर्तृत्वेनाधिकारिता, न त्वौपदेशिक्य[1]अवस्था, औपदेशिक्यवस्थायास्तु एतच्छास्त्रस्य तात्पर्यार्थग्राहकदेशित्वे तादृङ्मनीषाया उत्पत्तेरभावात्। तादृङ्मनीषाया उद्भवकालस्तु पौगण्डवदिष्टाद्[2]औत्तरीयकः॥ २॥

इदानीमङ्गप्रधानोपदेशेन सुषुप्त्यवस्थां प्राप्तस्य मनसिजस्य उद्बोधकोपायमुपदि-

[1]उपदेशयोग्या बाल्यावस्थेत्यर्थः।
[2]षोडषवर्षादुत्तरः काल इत्यर्थः।

शति —

**दर्पकोद्बोधने श्यामाधरसुधाप्राशनमौपदेशिकाङ्गम्॥ ३॥**

**दर्पकोद्बोधनेति।** ननु किं नामोद्बोधनम्? सुषुप्त्यवस्थां परिहृत्य औपदेशिक्यवस्थायाः[3] सङ्ग्रहणेनावस्थानमुद्बोधनम्, सुषुप्त्यवस्थां प्राप्तस्यानन्यजस्य औपदेशिक्यवस्थाभावे तत्र प्रसृतिं विधातुमशक्यत्वात्। जाग्रदवस्थाया औपदेशिकाङ्गस्याङ्गत्वे साधनत्वमभीप्सिततमत्वं च। अभीप्सिततमत्वं हेतुः कारणत्वं, औपदेशिक्यवस्थाभावे सकलाङ्गप्रवृत्तेर्विध्वंसनापत्तेः। तत्र कर्मण्याद्यमङ्गम्। ननु किं नामाङ्गत्वम्? सन्निपत्योपकारकत्वमाश्रयीकृत्यानन्दकार्यानुरञ्जने उपकारकत्वम्। अङ्गस्य प्रकारकत्वेन निदर्शनम् — **श्यामाधरसुधाप्राशनम्** इति अधरे सुधावथाने गान्धर्वनिगमस्य प्रामाण्यम् — योषाधरपल्लवं सुधाया औत्पत्तिकमजस्रं स्थानमिति। तादृक्सुधाप्राशनं प्रसुप्तस्य कामस्य प्रबोधजनकं (यथा) यत्किञ्चित्प्रज्वलितस्य वह्नेः अव्यभिचारेण प्रबोधकं घृतबिन्दुवत्। प्राशनं नाम स्वकीयदद्भिः मन्दव्यवसायेन दंशनम्, तेन दंशनेन तत्राधरे जनितस्यामृतोद्रेकस्यानुगीर्णनं प्राशनमवाङ्गाभिपर्यन्तं शर्कराखण्डेन रचितं मधुरपानीयमिवेति साभिलाषप्राशने दृष्टान्तः॥ ३॥

ननु योषया सह रतिकरणमानन्दप्रबोधार्थम्, एवंस्थिते तादृगानन्दप्रबोधे कतिसङ्ख्याकस्याङ्गस्येप्सिततमत्वमित्याशङ्क्य ईप्सिततमस्याङ्गस्य निदर्शनं स्वमुखेन विशदयति —

**अङ्गचतुष्टयोपलक्षितो रत्यानन्दः॥ ४॥**

**अङ्गचतुष्टयेति।** रत्यानन्दः, तत्पुरुषः समासोऽयम्। तत्र रत्यानन्दशब्दयोः स्वरूपार्थं विवृणोति — पृथग्रूपेणावस्थितस्येन्द्रियद्वितयस्य स्वकीयाधिष्ठातृदेवतया सह साङ्कर्येण एकस्वरूपकरणं रतिः, एकस्वरूपकरणादुत्पन्नो य आनन्दः स रत्यानन्दः। अतीव औपदेशिकस्य गुणस्य अतिरेकः वर्धनमानन्दशब्दार्थः। तादृग्रत्यानन्दोऽङ्गचतुष्टयेन उपलक्षितोऽङ्गचतुष्टये क्रियमाणे आनन्दोऽपरोक्षानुभवदर्शनेन प्रकाशितो भवति। न ह्यङ्गजातप्रकाशं विना प्रधानकार्यस्योत्पत्तिर्भवति, प्रधानकार्यस्योत्पत्तौ अङ्गजातप्रकाशस्य प्रयोजकत्वात्। प्रकृतिपुरुषयोः ऐक्यस्वरूपेणावस्थानं परमानन्दः। रत्यानन्देऽपि शरीरद्वयस्य ऐक्यस्वरूपेणाव-

---

[3]अत्र कामशास्त्रोपदेशयोग्यावस्था औपदेशिक्यवस्था ग्राह्या।

स्थितेर्दृश्यमानत्वाद्भेदज्ञानस्य विध्वंसितत्वात् स्वरूपैक्यज्ञानस्य साधकं रत्यानन्द इत्य् निर्गलितोऽर्थः ॥ ४॥

औपदेशिकाङ्गविवेचनं प्रतिपादितं श्यामाधरसुधाप्राशनमित्यनेन, द्वितीयाङ्गकार्यविवेचनं विस्पष्टयति —

## उरसि कुचाभ्यां संश्लेषणं द्वितीयमङ्गम् ॥ ५॥

**उरसि कुचाभ्यामिति।** उरसि स्वकीयहृदयस्थले योषायाः कुचाभ्यां संश्लेषणं संयोजनं जतुकाष्ठवदद्वितीयरसाविर्भाविनातीवबलवत्तरया उत्साहशक्त्या आलिङ्गने क्रियमाणे कुचयोः संश्लेषणमुपमर्दनं स्वकीयेनोरसा आच्छन्नत्वात्स्वकीयस्वरूपादर्शनं च भवतीति व्यक्तार्थस्यैवानुकथनम्॥ ५॥

द्वितीयाङ्गं विविच्य तृतीयाङ्गविवेचनं विस्पष्टयति —

## दोष्भ्यां कुचयोरुपमर्दनं तृतीयमङ्गम् ॥ ६॥

**दोष्भ्यामिति।** दोष्भ्यां हस्ताभ्यां भुजबाहुप्रवेष्टोदोरिति कोशस्मरणात्। कुचयोरुपमर्दनं निष्पीडनं स्थूलतमामलकफलवत्, यथामलकप्रपीडनं लोके दृष्टं तथा प्रपीडनं कर्तव्यम्, (तच्च ?) स्वकीयेन्द्रियनाडीनां प्रफुल्लत्वे हेतुः कारणम्, तथा च भारतीयं सूत्रम् — उदञ्जिनाडीनां प्रफुल्लताकारकं किशोरीस्तनयोर्मर्दनमिति॥ ६॥

तृतीयमङ्गं विविच्य चतुर्थाङ्गं विस्पष्टयति —

## जतुकाष्ठवत्संश्लेषणं तुरीयमङ्गम् ॥ ७॥

**जतुकाष्ठवदिति।** संश्लेषणस्य जतुकाष्ठवदिति निर्दर्शनं तु अतिदृढतरमालिङ्गनं कर्तव्यमिति द्योतनार्थम्, यथा जतुरतीव दृढवत्तमेन काष्ठमाश्लिषति तादृक्संश्लेषणं रत्यानन्देऽपि कर्तव्यमिति प्रबोधितुं तादृङ्निर्देशः। ईदृगालिङ्गनमङ्गकार्यं रत्यानन्दप्रबोधजनकम्, आनन्दस्थितौ स्थाणुवन्निश्चलत्वेनाअवस्थितेर्दृश्यमानत्वादत्रापि तादृगवस्थानं संश्लेषणस्य पश्चात्परिदृश्यते। कुत ? इति चेत्, प्रकृतिस्वरूपस्य स्वस्मिन्निमग्नत्वेनानुदर्शनात्। द्वैतभ्रान्तिनिवृत्तौ यो परमानन्दः तादृगानन्देनोपमितो रत्यानन्द इत्यर्थः ॥ ७॥

रत्यानन्दः परमानन्दत्वेन प्रमित इति पूर्वसूत्रेण प्रतिपादितम्। ननु परमानन्दस्य स्वरूपानुभवानन्तरमपवर्गाख्यस्यानन्दस्यानुभवे जिज्ञासायां सत्यां तत्र कतमत् अङ्गजातं जिज्ञासायामुपकरणमिति वादिना शङ्किते सति शङ्कानिरासार्थमीप्सिततममङ्गजातं स्वमुखेन विस्पष्टयति —

**स्वाधिष्ठानसुधाया अनुप्राशनं परमानन्दकारः ॥ ८॥**

**स्वाधिष्ठानसुधाया इति।** अपवर्गशब्देन मोक्षः मोक्षोऽपवर्गोऽथाज्ञानम् इति कोशस्मरणात्। मोक्षानन्दानुभवे जिज्ञासायां सत्यां तादृगानन्दानुभवार्थम् स्वाधिष्ठानसुधाया अनुप्राशनं तादृगानन्दप्रमितौ परिज्ञाने कारणमित्यर्थः। अत्र यत्किञ्चिद्वादी आशङ्कते — ननु सुधाया अधिष्ठानं तु युवतीनामधरपल्लवं, स्वाधिष्ठानं सुधाया आस्थानमिति कुत्रापि नैव श्रुतमिति चेत्, मैवम्, तस्यापि सुधावस्थानत्वम्, तथा च वात्स्यायनीयं सूत्रम् — उभयत्र सुधावस्थानं योषाधरपल्लवे स्वाधिष्ठानस्य मुखचूचुकाग्रे चेति। निर्लोमयोनिमुखचुम्बनमपवर्गानन्दानुभवे परमसाधकं कारणमित्यर्थः ॥ ८॥

अपवर्गानन्दानुभवानन्तरं ब्रह्मानन्दानुभवे जिज्ञासायां सत्यां तत्र कतमत्साधनं ब्रह्मानन्दानुभवस्येति संशयवाक्ये विचिकित्सायां सत्यां तत्र साधनमुपवर्णयन् वाक्यार्थतत्त्वं विवेचयति —

**अनन्यजसद्मनि साकल्येनोदञ्जिप्रवेशः ब्रह्मानन्दस्योपादानकारणम् ॥ ९॥**

**अनन्यजसद्मनीति।** अनन्यजसद्मनि पञ्चशरमन्दिरे स्वाधिष्ठानरन्ध्रे साकल्येन कृत्स्नस्वरूपप्रवेशेन न तु पादार्धांशभागेन उदञ्जिप्रवेशः। प्रवेशनं साकल्येन स्वकीयस्वरूपान्तर्धानं ब्रह्मानन्दस्यातिस्थूलतमत्वात्सर्वेषामानन्दानां मूर्धसु अवस्थितस्य ततः परमानन्दाभावात् तादृगानन्दानुभवस्यापरोक्षानुभवनमनुभवं कर्तुं प्रवेशस्य परमकारणत्वम्। कृत्स्नशिश्नप्रवेशनानन्तरं ब्रह्मानन्दजन्यं सुखमनुभूयत इत्यर्थः, स एको ब्रह्मण आनन्द इति श्रुतेः ॥ ९॥

ब्रह्मानन्दप्राप्तिकारणं विविच्य इन्द्रानन्दानुभवे कारणसाधनं प्रदर्शयति —

**उदञ्जिसामिप्रवेशः लेखर्षभानन्दे प्रयोजकीभूतो हेतुः ॥ १०॥**

**उदञ्जिसामिप्रवेश इति।** सामिप्रवेशः अर्धप्रवेशः अर्धभागे तु सामि

स्यादिति शब्दार्णवे। लेखर्षभः इन्द्रः, तदीयानन्दस्य कारणम्। ब्रह्मानन्ददृष्ट्या लेखर्षभानन्दस्य सूक्ष्मत्वात्तादृक्सूक्ष्मानन्दस्य प्रकाशने अर्धोदञ्जिप्रवेशस्य कारणत्वमित्यर्थः ॥ १० ॥

अञ्जिस्थाने अनुक्षणव्याघातस्य साधकतमं दार्ढ्यं परमकारणम् ॥ ११ ॥

सङ्कुचितस्वाधिस्थानस्य भेदनकार्यजन्यमानन्दमवाङ्मनसगोचरम् ॥ १२ ॥

सर्दगृदिव्याघातः चिदाभासस्यानुदर्शने परमकारणम् ॥ १३ ॥

दर्पकजन्यस्याभ्यर्हितत्वे एकतल्पारोहणस्यात्यावश्यकत्वात् ॥ १४ ॥

युवत्यभिलाषा रत्युत्साहवर्धने हेतुः ॥ १५ ॥

पुरुषाभिलाषायाश्चानुषङ्गिकत्वात् ॥ १६ ॥

औपदेशिकस्यानङ्गसङ्ग्रामस्य युवतीनामानन्दतृप्तौ प्रयोजकत्वाभावात् ॥ १७ ॥

द्वितीयाहवे तु तत्सत्त्वात् ॥ १८ ॥

पुरुषाणां तद्वैपरीत्यात् ॥ १९ ॥

आलिङ्गनकुचधारणादिरिव नीवीशयस्थापनस्याप्यभिमतत्वात् स्मरोद्दीपने असाधारणकारणरूपत्वात् ॥ २० ॥

व्यानतादिप्रबन्धस्य युवावस्थायाः प्रयोजकत्वात् ॥ २१ ॥

सर्दगृदिव्याघातजन्यस्यानन्दस्यानुभूतेरुभयनिष्ठत्वं रसानन्दानुभूतेरुभयत्र संश्लिष्टत्वात् ॥ २२ ॥

सेचनकालः सायुज्यानन्दस्यानुभवदर्शने प्रयोजकीभूतो हेतुः ॥ २३ ॥

उरोजसङ्ग्रहणे तद्गतकाठिन्यस्य प्रयोजकत्वम् ॥ २४॥

काठिन्यस्योपादानकारणरूपत्वात् ॥ २५॥

शम्बरारेरायोधने उदञ्चिधार्ष्ट्यप्रयोजकत्वम् ॥ २६॥

धातुसञ्चयोद्रेकस्यापि तथात्वमुभयोः कार्यकारणरूपत्वात् ॥ २७॥

योनिमुखे उदञ्चिमुखप्रवेशस्याचिरेण उरोजोद्भवे परमकारणत्वम् ॥ २८॥

प्रकृतिविकारस्य लोहितोपचयः रत्युत्साहवर्धने हेतुः ॥ २९॥

उभयोरुपचयः मन्मथसङ्गरस्य रुच्युत्पादकत्वे हेतुः ॥ ३०॥

अधरामृतास्वादनं तु औपदेशिकरसोत्पत्तेर्निदानम् ॥ ३१॥

रदने दशनं तु सन्निहितरसाविर्भावस्य कारणम् ॥ ३२॥

संश्लेषणस्यापि पूर्वोक्तरसस्यैवावस्थान्तरत्वम् ॥ ३३॥

जतुकाष्ठवत् संश्लेषेऽपि चरमरसस्यौत्सर्गिकत्वेन प्राधान्यम् ॥ ३४॥

सेचनदिष्टस्योपरिष्टाद्वर्तमानस्यानेहसः विरागोत्पादने हेतुकारणत्वम् ॥ ३५॥

मुहूर्तकालस्योपरिष्टाद्वर्तमानस्य समयस्योत्पन्नविरागस्य प्रध्वंसनद्वारा रत्युत्साहशक्तौ परमकारणम् ॥ ३६॥

निर्लोमयोनिसम्भेदस्य पुरुषशक्तेः परमकारणत्वम् ॥ ३७॥

पुरुषशक्तेरभावे सम्भेदं कर्तुमशक्यत्वात् ॥ ३८॥

पञ्चशरजन्ये युवत्यनुमतेः प्रयोजकत्वात् ॥ ३९॥

अनुमत्यभावे जन्यावसानस्यार्थाक्षिप्तत्वात् ॥ ४०॥

सहस्यदिष्टे दर्पकजन्यस्यातीवेप्सितत्वम् ॥ ४१॥

कुसुमसमयेऽपि तथात्वम् ॥ ४२॥

रोहिताश्वस्याधिष्ठानेऽङ्गप्रधानसाकल्येनानन्यजसङ्गरे यथेच्छमभ्यनुज्ञासम्प्रदानम् ॥ ४३॥

जैवातृकाधिष्ठानेऽपि तथात्वम् ॥ ४४॥

अनीचकाशे काले बाह्यतन्त्रस्यैव प्राधान्यम् ॥ ४५॥

उष्मकस्यानेहसि शरघस्रान्तरिते झषकेतोरायोधनस्याभ्यनुज्ञानम् ॥ ४६॥

प्रावृषि पङ्क्तिसङ्ख्याविच्छेदेन रतिजन्यस्योपदेशः ॥ ४७॥

अतिश्यामाभिः सह सम्प्रयोगो जनोलोकानन्दानुभवेऽनुशासनवाक्यस्योपदेशः ॥ ४८॥

तपोलोकस्यानन्दानुभवे पूर्वरूपपूर्णावस्थायाः नियतकारणत्वम् ॥ ४९॥

सर्वानन्दसमूहेभ्य उत्पन्नस्यानिर्वचनीयानन्दस्यानुभवे उपश्यामासम्प्रयोगः ॥ ५०॥

अतिक्रान्तावस्थया सह सम्प्रयोगो सामान्यानन्दस्यावभासकः ॥ ५१॥

प्रवेष्टसङ्ग्रहणात्तत्पुरस्ताद्यथेच्छं रतिविलासस्यनुशासनेऽधिकारकत्वम् ॥ ५२॥

दिष्टप्रकृतिविकारस्य प्रवेष्टसङ्ग्रहणं रतितन्त्रावसाने प्रयोजकीभूतो हेतुः ॥ ५३॥